दिवाकरद्युतिः

(वेदमार्तण्ड-आचार्यदिवाकरमहापात्राभिनन्दनग्रन्थः)

प्रकाशिका –
अर्वाचीनसंस्कृतसाहित्यपरिषद्
सी ६२, अक्षरधाम टेनामेन्ट्स,
मथुरानगरी समीप, अक्षरचोक,
वडोदरा, गुजरात, 390020
२०१६

ISBN :978-93-827 13-15-9

प्रतिलिपयः - ३००
प्रकाशनवर्षम् – २०१६
मूल्यम् – ५००
प्राप्तिस्थानम् – वेदनिकेतनम्, लुहागडजागा, शंकरानन्दमथलेन्
तिआडिसाहि, पुरी- ७५२००१ , ओडिशा
दूरभाषा- ०९४३७६९७५३०

मुद्रणम् – Pagemaker Computer Services
117, Bapuji Nagar, Bhubaneswar - 751009

# नैषधीयचरिते चित्रकलायाः निरूपणम्

डॉ. डायालाल एम. मोकरिया

**साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणविहीनः ।**
**तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम् ॥**[1]

इत्यक्त्वा सुभाषितकारेण मनुष्यजीवने साहित्यसङ्गीतकलानां महत्वं प्रतिपादितं वर्तते। मनुष्यस्य मनसः सुकुमारभावनानामभिव्यक्तिः कलायाः माध्यमेन भवति।[2]मनुष्यस्यैताः सुकोमलाः भावनाः चित्रसङ्गीतकाव्यादीनां स्वरूपेणाभिव्यक्ताः भवन्ति । काँश्चित्कलाः मनुष्यस्य भौतिकावश्यकताः पूरयन्ति तथा काँश्चित्कलाः मानसमाल्हादयति। सङ्गीतशिल्प-चित्रादिन्यकलाः मनोरञ्जनं कुर्वन्ति। साहित्यशास्त्रेऽपि कवयः तत्कालकलानां वर्णनं कुर्वन्ति। महाकविः कालिदासः, भासः, भवभूतिः, भारविः, श्रीहर्षः, बाणभट्टः, इत्यादयः कवयः स्वस्य काव्येषु चित्रकलायाः अपि प्रत्यक्षरूपेण वा परोक्षरूपेण वा वर्णनं कुर्वन्ति । महाकविः श्रीहर्षोऽपि नैषधीयचरिते चित्रकलायाः स्वाभाविकं वर्णनं करोति।

प्राचीनकाले नृपस्य परिवारस्य मनोरञ्जनार्थं चित्राणि चित्रकारैः कृतानि आसन् । नैषधीयचरिते राजकन्यादमयन्ती चित्रकारेण स्वस्य एवं नलस्य चित्रं कारितवत्यासीत्–

**प्रियं प्रिया च त्रिजगज्जयिश्रियौ लिखाधिलीलागृहभित्ति कावापि ।**
**इति स्म सा कारुतरेण लेखितं नलस्य च स्वस्य च सखमीक्षते ॥**[3]

अत्र दमयन्ती चित्रेण नलस्य सामीप्यं कल्पते । उत्तररामचरितेऽपि राजारामः स्वचरितं चित्रकारेण चित्रितं कारयति ।[4] तस्योद्देश्यम् मुख्यपात्राणि अपि प्रायः चित्रकर्मणि निपूणानि भवन्ति । नैषधचरितेऽपि नायकः नलः एवं नायिका दमयन्ती चित्रनिर्माणमपि कर्तुं शक्नुवतः

---

[1] सूक्तिसागर – पृ. ७०१

[2] नैषधकालीन भारत – पृ. १४५

[3] नैषधीयचरितम् – १/३८

[4] आर्य ! अर्जुनेन चित्रकारेणास्मदुपदिष्टमार्यस्य चरितमस्यां वीथिकायामभिलिखितम्। उत्तररामचरितम् –अङ्कः- १,पृ-८

222

हंसेन दमयन्त्याः चित्रं दर्शितं तदा नलोऽपि मनोविनोदार्थं तस्याः चित्रं चित्रयित्वा कण्ठाहार-मप्यारोपयति।[5] तच्चित्रं दृष्ट्वा स्त्रीयः आश्चर्यमनुभवन्ति। दमयन्त्यापि कुशला चित्रकर्त्र्यासीत्। कविः वर्णयति -

**वेत्थ मानेऽपि मत्यागदूना स्वं माश्च तन्मिथः।**
**मद्दृष्टाऽऽलिख्य पश्यन्ती व्यवधा रेखयाऽन्तरा? ॥[6]**

दमयन्त्यत्र स्वस्यैवं नलस्य संश्लिष्टचित्रस्य निर्माणं करोति तस्य निर्देशः वर्तते। नाट्यकारः श्रीहर्षोऽपि रत्नावलीनाटिकायां नायकनायिकयोः मनोविनोदाय चित्रदर्शनप्रसङ्गं निरूपयति। नायिकायाः सख्य अपि चित्रमालेखितुं शक्नुवन्ति। नैषधीयचरिते दमयन्त्याः मनोविनोदार्थं चित्रनिर्माणं करोति।

**विलेखितुं भीमभूवो लिपीषु सख्याऽतिविख्यातिभृतापि यत्र।**
**अशाकि लीलाकमलं न पाणिमपारि कर्णोत्पलमक्षि नैव ॥[7]**

दमयन्त्याःसखिहस्तस्थितं कमलं तत्कालं चित्रयति तस्य निर्देश एतस्मिन् श्लोके वर्तते। विरहाकुलदमयन्त्याः मनोरञ्जनार्थं सख्यः नलस्यानेकानि चित्राण्याप्यालिखन्ति। चित्रनिर्माणं विशेषावसरेऽप्यासीत्। आधुनिकयुगेऽपि दीपावलीनूतनवर्षाद्योत्सवे शुभप्रसङ्गे च रङ्गा-वल्यादीनामायोजनं भवति तथैव तदाप्यासीत्। दमयन्त्याः लग्नप्रसङ्गे कुण्डिनपुरम् सुशोभितम् आसीत्। राजमार्गस्योभयपार्श्वे सुन्दरचित्राणां शोभासीत्।पुरे पथिद्वागृहाणि तत्र चित्रीकृता-न्युत्सववाञ्छयैव। नभोऽपि किर्मीरमकारि तेषां महोभूजामाभरणप्रभाभिः ॥[8] विवाहोत्सव-निमित्ते मार्गस्य द्वाराणि गृहाणि च चित्रीकृतान्यासन्। चित्रस्य फलकास्यापि विचारः करणीयः। नैषधचरितानुसारं तस्मिन् काले चित्रकर्तारः भित्तिषु चित्रनिर्माणं कृत्वा मनोरञ्जनं कृतवन्तः।[9] भूमौ अपि चित्रमालीख्य चित्रकारः स्वप्रयोजनं सिद्धयति। यथा -

---

[5] नैषधीयचरितम् – ६/३७

[6] तत्रैव – २०/७७

[7] तत्रैव – ६/६४

[8] तत्रैव – १०/३१

[9] तत्रैव – १/३८

22

भैमीविनोदाय मुदा सखीभिस्तदाकृतीनां भुवि कल्पितानाम्।
नातर्कि मध्ये स्फुटमप्युदीतं यस्यानुबिम्बं मणिवेदिकायाम्॥[10]

भीमसूतायाः मनोविनोदार्थं सख्यः भूतले नलस्य चित्राण्यालिखन्ति। कमलपत्रेऽपि चित्रनिर्माणं भवितुं शक्यते। कविः लिखति –

**उल्लिख्य हंसेन दले नलिन्यास्तस्मै यथादर्शि तथैव भैमी।**
**तेनाभिलिख्योपहृतस्वहारा कस्या न दृष्टाजनि विस्मयाय॥**[11]

हंसः कमलपत्रे दमयन्त्याः चित्रमालीख्य नलं दर्शयति। अत्र मानवेतरः खगः अपि चित्रं निर्मातुं प्रभवति तस्यापि निर्देशः प्राप्यते।

महाकविना श्रीहर्षेण तत्कालीनललितकलासु चित्रकलायाः एतस्मिन् महाकाव्ये कविप्रतिभायाः तेजः पूरयित्वा वर्णनं कृतम्। चित्रैः जनानां परिस्थितिं मानसिकरूपेण प्रत्यक्षीकरोति। आधुनिकयुगेऽपि जनः भावचित्रं (Photograph) दृष्ट्वा मनोरञ्जनं करोति। चित्रकलाद्यापि वर्तमानप्रवाहस्यालङ्कारं धृत्वा विकसिता वर्तते। नैषधचरिते प्रणयिजनेभ्य चित्रकला किदृशी उपकर्त्री वर्तते तस्य मनोरम्यं वर्णनं कृतम् वर्तते। कविना कृतम् चित्रकलायाः वर्णनं प्रसङ्गोचितमस्ति। अत्र सम्पूर्णतया मनोवैज्ञानिकदृष्ट्या कविः प्रसङ्गमालिखति। नैषधचरितस्य चित्रकलायाः वर्णनं हृदयगतभावनाभिव्यक्तिः वर्तते। कवेः कव्यकौशलस्य चरमोत्कर्षः वर्तते तस्मिन् कापि शङ्का नास्ति।

सन्दर्भग्रन्थाः

१. नैषधीयचरितम्, कृष्णदास अकादमी, वाराणसी, २००२
२. सूक्तिसागर, उत्तरप्रदेश हिन्दी संस्थान, लखनऊ, २००४
३. उत्तररामचरितम्, सरस्वतीपुस्तक भण्डार, अमदाबाद, १९९२
४. नैषधकालीन भारत, रचना प्रकाशन, जयपुर, २००७

असि.प्रोफेसर,साहित्यविभागः,
श्री सोमनाथसंस्कृतविश्वविद्यालयः,वेरावलम्, गुजरात।

[10] तत्रैव – ६/७४
[11] तत्रैव – ६/३७

224

ત્રયી ચિંતન (TRAYEE CHINTAN)
સંસ્કૃત સાહિત્ય અને દર્શનોમાં મનોવૈજ્ઞાનિક અભિગમ

© **Sampaadak** - Prin. Dr. R. P. Mehta

©**Sahsampaadak** - Dr. A. M. Chocha
- Prof. S. J. Vaghela
- Dr. N. R. Suba

(પ્રસ્તુત પુસ્તકમાં રજૂ કરેલી દરેક બાબતોની જવાબદારી જે તે લેખનકર્તાની છે.)

**પ્રાપ્તિ સ્થાન :** Smt. C. P. Choksi Arts and Shree P. L. Choksi Commerce College, Veraval.

**ISBN No. 978-93-86103-14-7**

**પ્રથમ આવૃત્તિ : ૨૦૧૬**

કિંમત : ૩૫૦/—

**Publisher :**
**PRINCIPAL**
Smt. C. P. Choksi Arts and
Shree P. L. Choksi Commerce College.
Veraval.

**Setting & Printing**
**Kamlesh Prakashan Mandir**
G-52, Neo Square, P.N. Marg,
Near Income Tax Office,
Jamnagar - 361008.
Contact : 9879427072 / 9824163463
E-mail : kamleshprakashan@gmail.com

# અભિજ્ઞાન શાકુન્તલનાં દુષ્યંતના પાત્રમાં પ્રતિબિંબિત વ્યકિતત્વ લક્ષણ

ડૉ. ડી. એમ. મોકરીયા
શ્રી સોમનાથ સંસ્કૃત યુનિવર્સિટી રાજેન્દ્ર ભુવન રોડ, વેરાવળ.

માનવજીવનમાં વ્યકિતત્વ મહત્વનો ભાગ ભજગે છે સંસારમાં રહેતો દરેક વ્યકિતત્વ પોતાનું વ્યકિતનો અભ્યાસ ખૂબ જ જટીલ છે આમ છતાં પ્રાચીન કાળથી અત્યાર સુધી વિવિધ ઋષિમુનિઓ, કવિઓ, તત્વચિંતકો, મનોવૈજ્ઞાનિકોએ અને તેનો અભ્યાસ કર્યો છે.અને તે અંગેની અમૂલ્ય શોધો આપણી સમક્ષ રજૂ કરી છ. આપણા કવિઓએ પ્રત્યક્ષરૂપે અને કયાંક પરોક્ષરૂપે વ્યકિતત્વ અંગેના વિચારોને વ્યકત કરેલા છે. તેમાં મહાકવિ કાલિદાસ પણ પાછળ નથી. પેમણે પોતાના સુપ્રસિદ્ધ નાટક અભિજ્ઞાનશાકુન્તલમાં વ્યકિતની વિભાવના મહાકવિની અદાથી રજૂ કરી છે.

વ્યકિતત્વ શબ્દનો વ્યુત્પતિજન્ય અર્થ સમજીએ તો તેમાં વ્યકિતને ત્વ પ્રત્યય જોડી શબ્દ બનાવવામાં આવેલ છે વ્યકિત શબ્દવ્યજ્ ધાતુ (૭.૫) સ્પષ્ટ કરવું દર્શાવવું એવા અર્થમાં વપરાય છે તેના પરથી વ્યકિતત્વ શબ્દ બન્યો છે ઉપરોકત અર્થોના આધારે એવું કહી શકાય કે વ્યકિતને જેના દ્વારા સાર્થક કે નિર્થક કરવું આંતરિક અને બાહ્ય તેમ સૂક્ષ્મ અને સ્થુળ એમ ઊભયનો સમન્વય કરવું અસ્તિત્વ એટલે વ્યકિતત્વ મનોવૈજ્ઞાનિકોએ વ્યકિતત્વનો અભ્યાસ કરી તેને સમજાવવાનો પ્રયત્ન કરેલ છે, જેમકે મોર્ટન પ્રિન્સ લખે છે કે– Perseonality is the sum total of all the biological innate dispositios, impulses, tendencies, appecctites and instivcts of the individual and the acquired by experience,[૧]

અર્થાત્ વ્યકિતત્વ વ્યકિતની સમસ્ત જૈવિક, જન્મજાત પ્રકૃતિ,ઉદ્વેગ, લાગણીઓ, ઝંખનાઓનો સમૂહ તેમજ મનૌવૈજ્ઞાનિક પ્રવૃતિઓના સમુચ્ચય ઉપર ભાર કયો છે. જી. એસ. ઓણપોર્ટ વ્યકિતત્વની વ્યાખ્યા આપતાં લખે છે કે– personality is the dynamic organisation within the individual of those psycho-physical systems environment.[૨] સઓલપોર્ટના મતે વ્યકિતત્વએ વ્યકિતમાં અસ્તિત્વ ધરાવતું એક ગળ્યાત્મક કાર્યતંત્ર છે. જેમાં વ્યકિતનસી બધી જ મનોશારીરિ પ્રક્રિયાઓનો સમવેશ થાય છે. આ કાર્યતંત્ર સહેતુક હોય છે અને વ્યકિતના વાતાવરણ સાથેના અનન્ય સમાયોજનમે નિર્ધારિત કરે છે.

વ્યકિતત્વના વિવિધ ખ્યાલો અને વિભાવનાઓને આધારે ખ્યાલ આવે છેકે મનુષ્ય આંતરિક અને બાહ્ય સ્વરૂપના આધારે ઊભી થતી એક પ્રકારની વિશિષ્ટ ઓળખ એટલે વ્યકિતત્વ. આ ખ્યાલને આપણે અભિજ્ઞાનશાકુન્તલમાં પણ સૂચિત થયેલો જોઈ શકીએ છીએ.

અભિજ્ઞાન શાકુન્તલમાં પણ કવિએ વ્યકિતના બાહ્ય અને આંતરિક સ્વરૂપના આધારે ઓળખ આપવાનું રાખીએ આગળ ઉપસ્થિત થાય છે ત્યારે પ્રિયંવદા દુષ્યન્ત પ્રભાવશાળી આકૃતિ અંગે કુતૂહલ વ્યકત કરેછે[૩] અને અનસૂયા રાજર્ષિ હોવાનું અનુમાન કરે છે. તેવી જ રીતે શકુન્તલાની વિદાય વખતે સખીઓ ચિંતા કરે છે કે અંતઃપુરના સાનિધ્યના કારણે દુષ્યંત શકુન્તલાને જરૂર તો નહી ગયો હોયને ? એ વખતે પ્રિયંવદા કહે છે કે તેવી આકૃતિ ધરાવતા લોકો ગુણોની બાબતમાં વિરોધ આચરણ કતા નથી.[૪]

આમ અભિજ્ઞાનશાકુન્તલાના છઠ્ઠાઅંકમાં રાજા દુષ્યંતને શકુન્તલાની યાદ સતાવી રહી હોય છે.તે વખતે કચુંકી રાજાના જોઈને કહે છે કે વિશેષ આકૃતિ વાળા બધી જ અવસ્થામાં રમણીય હોય છે.[૫]

મહાકવિ કાલીદાસે દુષ્યંતના પાત્રને ઓળખાવવા માટે જે બાહ્ય પરિબળોનો સંદર્ભ આપેલ છે તે મનોવિજ્ઞાનની સ્વીકૃત બાબત છે મનોવિજ્ઞાનિકોએ પણ વ્યકિતના શારીરિક સ્વરૂપને પણ વ્યકિતત્વમાં સ્વીકારેલ છે કે સમર, હિપ્પો કેટીજ, ગેલમ જેવા મનોવૈજ્ઞાનિકોએ વ્યકિતના શરીર બંધારણના આધારે વ્યકિતત્વને સમજવવાના પ્રયત્ન કર્યો છે ગેલને જેને રકત પ્રધાન વ્યકિતત્વગણાવું છે અને હિપ્પોકેટી છે જેને ઉત્સાહી(sangqine) સત્તપ્રધાન વ્યકિતત્વને વ્યકિતત્વ ગણાયું છે ત.વી વ્યકિતઓમાં ઉત્સાહ આત્મિયતા અને આશાવાદ વધુ જોવા કળે છે.રાજા દુષ્યંતનું વ્યકિત પણ આ પ્રકારનું ગણાયવી શકાય તેમ છે.

અભિજ્ઞાનશાકુન્તમાં દુષ્યન્તનું પાત્રની એક વિશેષતાઓનું મનોવૈજ્ઞાનિક વિશ્લેષણ થઈ શકે તેમ છે. દુષ્યંત પ્રભાવશાળી વ્યકિતત્વ ધરાવે છે આશ્રમનુ કન્યઓ તેનાથી પ્રભાવવિત થાય છે કણ્વના શિષ્યો પણ તેને આર્શીવાદ આપે છે.

દુષ્યંત કલારસિક નાયક છે સ્વર અને શબ્દને ઓખવાની સંવેદનશીલતા તેનામા છે આથી જ તે હંસપદિકાના ગીતની નોંધ લે છે એટલું જ નહી શકુન્તલાના વિરહમાં તે તેણીનું ચિત્ર ઘેરે છે મનોવૈજ્ઞાનિકકાલયુગે વ્યકિતત્વના અંત મુંખી (Introverts) અને બર્હિર્મુખી (Extroverts) એમ બે પ્રકારો દર્શાવ્યા છે.[૬] તેના અભ્યાસ અનુસાર અંતર્મુખ્રી વ્યકિતત્વ ધરાવતી વ્યકિતઓ એકાંત પ્રિય સમૂહને ઓછું પસંદ કરનારી હોય જેવી કે કવિ,ચિત્રકાર, વગેરે આ પ્રકારની વ્યકિતઓ હોય છે જ્યારે સમૂહ તેનાથી વિરોધી વર્તન કરનારી વ્યકિતઓ બર્હિમુખી વ્યકિતત્વવારી છે તેઓ એકાંતમાં રહી શકતી નથી. જેમાં વકીલ,નેતાઓ,વગેરે બર્હિર્મુખી વ્યકિતત્વ ધરાવે છે આ દ્રુષ્ટિ દુષ્યંત વ્યકિતત્વ અંતર્મુખી છે મનોવૈજ્ઞાનિક શેલ્ડને સ્વભાવ(temperament) ના આધારે વ્યકિતત્વના આધારપ્રિય (viscerotonic),પ્રવૃત્તિકેન્દ્રિ (somatotonic) અને એકાંત પ્રિય (cerebrotonic) એમ ત્રણ પ્રકારો પડેલા છે.[૭] શકુન્તલા સાથેના પ્રયણવ્યવહારમાં મુખ્યત્વે દુષ્યેતએકાતપ્રિય વ્યકિતત્વનું પ્રતિનિધિત્વ કરે છે.

વ્યકિતત્વનું અભ્યાસના આધારે દરેક વ્યકિતનું વ્યકિતત્વ નીજી હોય છે. આથી દુષ્યંતને પણ કોઈ એક જ વ્યકિતત્વમાં સંપૂર્ણપણે સાબિત કરવો એ વધારે પડતું છે. વ્યકિતત્વમાં અમૂક વ્યકિત લક્ષણનાં પ્રાધાન્યની આધારે તે પ્રકારનું વ્યકિતત્વ ધરાવે છે અને કહી શકાય.

---

१.व्यक्तित्व का मनोविज्ञान-पृ.२

२.personulity Apsy cological interpretation.p.18

३.को नु खल्वेष चतुरगम्भीराकृतिमधुरामालपन्प्रभाववानिवलक्ष्यते।अ.शा.अं-१.५१८

४.न हितादृशा आकृत्तिविशेष गुणविरोधिनो भवति ।अ.शा.अं-४.१४०

५.सर्वावस्थासु रमणीयत्वमाकृतिवशेषणाम् । अ.शा.६

६.समाज मनोविज्ञान-पृ २१४,२४५

७.the varities to temperament:Aphychology of constitutional ditterences.p.40

प्रकाशकः -

डॉ. दशरथः जादवः
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाषः - ०२८७६-२४४५३२, फेक्स : २४४४१७
E-mail: sssu.veraval@gmail.com
www.shreesomnathsanskrituniversity.info

समन्वयकः -

डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

*© Shree Somnath Sanskrit University, 2017*

प्रथमं संस्करणम् - जनवरी - २०१७

प्रतयः - ३५०

ISBN - 978-93-83097-19-7

मूल्यम् - रु. २५०/-

मुद्रकः - जलाराम ग्राफिक्स एन्ड ओफसेट
परमहंस अेपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) २२१८६१

Shree Somanth Sanskrit University Grantha Series - 3

# Vākyārthajyotiḥ

Issue - 1 Year - 2014-15

Chief-Editor
**Prof. Ark Nath Chaudhary**

Editors
**Dr. Lalitkumar Patel**
**Dr. Janakisharan Aacharya**

**Shree Somnath Sanskrit University - Veraval**

# वसंस्कृतसाहित्यदृष्ट्या धर्मः

ꕥ डॉ. डायालाल एम. मोकरिया

'धृञ्' धारणे इति धातुतः धर्मशब्दः निष्पन्नो भवति। तस्य व्युत्पत्तिः भवति– धरति लोकान् अथवा ध्रियते पुण्यात्मभिः यः सः धर्मः। यः लोकान् धरति अथवा पुण्यात्मभिः यं धारयते सः धर्मः अस्ति। धर्मशब्दस्य प्रयोगः ऋग्वेदे अपि प्राप्यते। ऋग्वेदे कुत्रचित् नामपदे एवं कुत्रचित् विशेषणपदे प्रयोजितः वर्तते।

संस्कृतसाहित्यस्य विविधेषु ग्रन्थेषु धर्मस्य प्रत्यक्षरूपेण परोक्षरूपेण वा स्पष्टीकरणं कृतम्। महर्षिणा कणादेन तु वैशेषिकदर्शने उक्तम् -

यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।[१]

अर्थात् येन अभ्युदयस्य एवं निःश्रेयसः सिद्धिः भवति सः धर्मः अस्ति।

महाभारतेऽपि धर्मस्य लक्षणं दत्तं वर्तते।

धारणाद्धर्ममित्याहुर्धर्मेण विधृताः प्रजाः।
यः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः॥[२]

अर्थात् यया शक्त्या सम्पूर्णा सृष्टिक्रिया रक्षिता भवति स एव धर्मः अस्ति। महाभारते व्यासः चतुर्विधपुरुषार्थसन्दर्भेऽपि कथयति-

'ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे।
धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते॥'[३]

मनुस्मृतौ धर्मस्य स्पष्टतार्थं दशतत्त्वानां समुच्चयस्य निर्देशः कृतः -

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥[४]

अर्थात् - धृतिः, क्षमा, दमः, अस्तेयं, शौचम् (पवित्रता), इन्द्रिनिग्रहः, धीः, विद्या सत्यम् एवम् अक्रोधः - इति दशतत्त्वानां समुच्चयः धर्मः अस्ति।



श्रीमद्भागवद्पुराणे तु धर्मस्य परिभाषायाम् इतोऽपि अधिकतत्त्वानां निर्देशः परिगणितः

सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः।
अहिंसा ब्रह्मचर्यं च त्यागः स्वध्याय आर्जवम्॥
संतोषः समदृक् सेवा ग्राम्येहोपरमः शनैः।
नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम्॥
अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः।
तेष्वात्मदेवताबुद्धिः सुतरां नृषु पाण्डव॥
श्रवणं किर्तनं चास्य स्मरणं महतां गतेः।
सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणम्॥
नृणामयं परो धर्मः सर्वेषां समुदाहृतः।
त्रिंशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति॥[५]

अत्र नारदः युधिष्ठिरं कथयति यत्-सत्यं, दया, तपश्चर्या, शौचम्, तितिक्षा, उचितानुचितयोः विचारः, मनः संयमः, इन्द्रियाणां संयमः, अहिंसा, ब्रह्मचर्यं, त्यागः, स्वाध्यायः, सरलता, संतोषः, समदर्शनम्, सेवा शनैः शनैः सांसारिकभोगेभ्य निवृत्तिः, मनुष्यस्य अभिमानपूर्णप्रयत्नानां फलस्य वैपरित्यस्य दर्शनम्, मौनम्, आत्मचिन्तनम्, भूतेभ्यः अन्नादिनां यथायोग्यविभाजनम्, तेषु एवं विशेषरूपेण मनुष्येषु स्वात्मनः एवम् इष्टदेवस्य दर्शनम्, भगवतः नाम-गुण-लीलादिनां श्रवणं, कीर्तनं, स्मरणं, तस्य सेवा, पूजा, नमस्कारः, दास्यभावः, सख्यभावः एवम् आत्मसमर्पणमिति त्रिंशदाचारलक्षणं मनुष्यस्य परं धर्मः वर्तते। तेन सर्वात्मा भगवान् संतुष्टः भवति।

श्रीमद्भगवद्गीतायाः श्लोकारम्भः एव धर्मशब्देन भवति -

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥[६]

एतत् तु सुविदितमेव अस्ति यत् समराङ्गणे अर्जुनः स्वजनान् दृष्ट्वा मोहवशाद् युद्धं न कर्तुमिच्छति। तदा भगवान् कृष्णः तस्मै धर्मोपदेशं ददाति। अत्र केवलम् अर्जुनायैव धर्मोपदेशः नास्ति, किन्तु आधुनिकमानवस्य कृते अपि तादृशः एव लाभप्रदः उपदेशः अस्ति। एषः संसारः अपि एकं समराङ्गणं वर्तते मनुष्याणां चित्ते सदैव आन्तरिकं विचारयुद्धं तु प्रचलत्यैव। तादृशः मनुष्यः दुर्लभः अस्ति यस्य चित्ते विचारद्वन्द्वं कदापि

न भवेत्। मनोवैज्ञानिकाः एतस्याः परिस्थित्याः कृते संघर्षः (Conflict) इति शब्दप्रयोगं कुर्वन्ति। मुख्यत्त्वे त्रिविधः संघर्षः भवति-अभिगमनाभिगमनसंघर्षः, विगमनविगमनसंघर्षः एवम् अभिगमन-विगमनसंघर्षः। अगिमनाभिगमनसंघर्षे विकल्पद्वयं स्वीकार्यम् भवति किन्तु एकस्यैव प्राप्तिः शक्या भवति। विगमनविगमनसंघर्षे विकल्पद्वयम् अस्वीकार्यं भवति किन्तु एकस्य स्वीकारः अनिवार्यः भवति। अभिगमन-विगमनसंघर्षे एक एव विकल्पः स्वीकार्यः अपि दृश्यते अस्वीकार्यः अपि दृश्यते तदा तस्य निर्णयस्य समस्या भवति। अर्जुनस्य अपि एतादृशी स्थितिरस्ति अतः भगवान् कृष्णः मार्गं दर्शयति।

श्रीमद्भगवद्गीतायां प्रारम्भात् एव धर्मस्य आचरणस्य निर्देशः कृतः। 'धर्मक्षेत्रे कुरुक्षेत्रे....' अत्र शब्दयोजनां कृत्वा "क्षेत्रे धर्मं कुरु।" अर्थात् भवतः क्षेत्रं वर्तते, भवतः यत् कर्म वर्तते तत्र धर्मस्याचारणं कुरु। अग्रे पश्यामः तदा पुनः स्पष्टता भविष्यति यत्-क्षेत्रे क्षेत्रे धर्मं कुरु। अर्थात् प्रत्येकस्मिन् क्षेत्रे धर्मस्य आचरणं कुरु। इतोऽपि अग्रे गच्छामः तदा समवेताः (एकत्रितेषु) क्षेत्रे क्षेत्रे (प्रत्येकस्मिन् क्षेत्रे) धर्मं कुरु। अर्थात् कापि समस्या भवति अथवा एकत्रितपरिस्थितिसु केवलं धर्मस्य एवाचरणं करणीयम्। अग्रेऽपि युयुत्सवः (युधि) अर्थात् मानसिकद्वन्द्वयुद्धे। मामकाः पाण्डवाः च दृश्यन्ते तत्रापि प्रत्येकस्मिन् क्षणे धर्मस्य आचरणं करणीयम्।

श्रीमद्भगवद्गीतायां धर्मस्य सरला एवं व्यापकी व्याख्या दत्ता वर्तते। अत्र मनुष्यस्य कर्तव्यमेव धर्मः वर्तते। अतः भगवान् श्रीकृष्णः प्रत्यक्षरूपेण एवं परोक्षरूपेण अर्जुनाय कर्तव्यपालनस्य मार्गं दर्शयति। भगवान् कृष्णः निर्दिशति यत् -

> श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।
> स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।[७]
> स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।[८]

अन्तेऽपि भगवान् कृष्णः अर्जुनाय कथयति यत् यतो धर्मः ततो जयः। अर्थात् धर्मेण विजय भवति। मनुष्यः स्वकर्तव्यपालनरतः भवति तस्य जयः अपि भवत्यैव।

वाल्मीकिः अपि रामायणे वारंवारं धर्मस्य परिभाषां स्पष्टयति यथा -

> धर्मादर्थः प्रभवति धर्मात् प्रभवते सुखम्।
> धर्मेण लभते सर्वं धर्मसारमिदं जगत्॥[९]

अत्र भगवती सीता रामं स्मारयति यत् धर्मात् एव धनं प्राप्यते, सुखं च लभते।



धर्मेण एव सर्वं प्राप्यते। एतस्य जगतः सारः धर्मः एव अस्ति। रामायणे भगवतः रामस्य चरित्रं तु साक्षात् धर्ममूर्तिः एव अस्ति।

महाकविकालिदासः तु शरीरं धर्मस्य साधनं मन्यते। मानवशरीरेण धर्मः सिद्ध्यते। मनुष्यः जागरुकतया धर्मे निमग्नः भवति तदा सात्त्विक आनन्द अपि अनुभवति। इतिहासे, अस्माकं साहित्यशास्त्रे अनेकानि उदाहरणानि सन्ति।

महाराजः हरिश्चन्द्रः कष्टं सहते किन्तु चाण्डालस्य सेवकः भूत्वा स्वामिनिमित्तं स्वपत्न्याः अपि मृतपुत्रस्य करं ग्रह्णाति। राजा बली स्वस्य शीरसम् अपि मापयित्वा वामनस्य सत्कारधर्मं पालयति। राजा दशरथः प्रजान् त्यक्त्वा अपि नृपाणां वचनपालनस्य धर्मं पालयति। ऋषिः दधीचिः स्वस्य शरीरस्य अस्थि अपि ददाति किन्तु परोपकारधर्मं न त्यजति। अयि, भीष्मेण दुर्योधनस्य अन्नं खादितम् अतः तु सः युद्धे तस्मात् दूरं न भवति। बालकः नचिकेता पितृवचनपालनार्थं यमगृहम् अपि गच्छति। भारतीयसंस्कृतौ धर्मः एतादृशः वर्तते।

संक्षेपे, धर्मः इत्युक्ते मनुष्यस्य कर्तव्यम्। मनुष्येण देशकालस्थित्यनुसारं धर्मस्य अनुसरणं करणीयम्। यथा - पितापुत्रयोः सम्बन्धे पुत्रः पिता समक्षं पुत्रधर्मस्य पालनं कुर्यात् एवं पिता पुत्रं प्रति पितृधर्मस्य पालनं कुर्यात्। सः एव पुत्रः शालां महाशालां च आगत्य गुरुं प्रति शिष्यधर्मस्य पालनं कुर्यात्। जनः पत्नीसमक्षं पतिधर्मस्य, भगिनीं प्रति भ्रातृधर्मस्य एवं पुत्रीं प्रति पितृधर्मस्य पालनं कुर्यात् अर्थात् जनस्य स्थानं अथवा स्वरूपं परिवर्तितं भवति तदा जनः तदनुरूपं धर्मं पालयति। तस्यां क्षणमात्रम् अपि विकृतिः आगच्छेत् तदा सर्वेषां कृते हानिः भवति। यथा सूर्यः क्षणमात्रेण शीतलः भवेत् तदा अस्माकं जीवनं दुष्करं भवति। जलम् अग्निधर्मं प्राप्यते तदा किदृशस्थितिः भवितुं शक्यते तत् स्पष्टं वर्तते। अपि च सामान्यं भूस्खलनं भवति तदा कति जीवाः विनष्टाः भवन्ति। जडवत्प्रकृतिः अपि स्वधर्मं त्यजेत् तदा महाहानिः भवति तदा मनुष्यस्य तु का वार्ता! अर्थात् मनुष्याय अपि स्वधर्मस्य पालनम् अनिवार्यं वर्तते।

मनुष्यः स्वस्य पूर्वनिर्धारितं कर्तव्यं पालयिष्यति तदा सात्त्विकः आनन्दः प्राप्यते। कर्तव्ये विक्षेपं करिष्यति तदा अधर्मः भविष्यति। अधर्मः सर्वेषां कृते हानिप्रदः एव भवति अतः स्वधर्मस्य पालनं कृत्वा मनुष्यजीवनं सार्थकं करणीयम्।

* * *

## पादटिप्पणयः

(१) वैशेषिकदर्शनम्, १/२
(२) महाभारतम्, शान्तिपर्व, १०९/११
(३) तत्रैव
(४) मनुस्मृतिः, ६/९२
(५) श्रीमद्भागवतद्पुराणम्, ७/११/८-१२
(६) श्रीमद्भागवद्गीता, १/१
(७) तत्रैव, ३/३५
(८) तत्रैव, १८/४५
(९) रामायणम्, अरण्यकारण्डम्, ९/३०

***

250

# आयुर्वेददृष्ट्या आरोग्यप्राप्तौ आहार-विहारयोः योगदानम्

✍ डॉ. पङ्कजकुमार एस्. रावलः

'शरीरं व्याधिमन्दिरं' शीर्यते इति शरीरं मानवशरीरम् आदि-व्याधिउपाधीनां गृहं विद्यते। अत्रैव चतुर्षु वेदेषु ऋग्वेदस्योपवेद आयुर्वेदः प्रस्थापितः येन ऋग्वेददृष्ट्या मानवः जीवनं यापयति चेदायुर्वेदस्यावश्यकता न भविष्यति यदि तदनुगुणं न जीवति चेदायुर्वेदः साक्षात्पुरः स्थितः।

अस्माकं शास्त्राणि अत्रैव पूज्यानि मान्यानि आदरपूर्णानि वन्दनीयानि च सन्ति यद्मानवस्य प्रत्येकऽस्मिन् समये चिन्तां कुर्वन्ति सर्वास्ववस्थासु स्थितानि भवन्ति। न स्थितानि अपि तु तादृशास्ववस्थासु मार्गदर्शनमपि कुर्वन्ति संशयानां संहारमपि कुर्वन्ति।

शरीरे रोगः तदैव प्रविशति यदा मनोबलं मानवस्य क्षीणं स्यात् भवेद्वा। मनोबले शिथिले जाते सति रोगः प्रवेशं प्राप्नोति। मानसिकरीत्या मानवः रुग्णः प्रप्रथमः भवति पश्चात् शारीरिकदृष्ट्या रुग्णः भवति। अतः यदि मानवः शारीरिकदृष्ट्या स्वस्थः स्यातुमिच्छति चेत् तस्य द्वौ उपायौ स्तः।

(१) प्रथमस्तु तेन मानसिकदृष्ट्या स्वस्थेन भाव्यम्।
(२) वेदपरम्परया ऋषिपरम्परया जीवनं यापनीयम्।

अर्थात् ऋषिभिः या दिनचर्या निर्दिष्टा वर्तते तस्याः परम्परायाः वाहकत्वेन स्थातव्यं जीवनं यापनीयम्। तर्हि प्रश्नः भवति तत्र वेदपरम्परायां के नियमाः सन्ति तदर्थं ऋषिभिरुक्तम् यत् -

हिताशी स्यान्मिताशी स्यात् कालभोजी जितेन्द्रियः।[१]

अद्य मानवः मौनं धारयितुं शक्नोति किन्तु कदा कुत्र केन सह कीदृशं कियद्वक्तव्यं तन्न जानाति। संयमपूर्वकस्य भाषणस्य ज्ञाता कश्चित् विरलः भवति। इयमेव वार्ता एतदेव कः अयमेव नियमः भोजनविषये प्रज्वलति। स्वास्थ्यं सुरक्षितं स्थापयितुं

# कर्मकाण्डसंस्कारविज्ञानम्

(महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, श्रीसोमनाथसंस्कृतियुनिवर्सिटी, तथा सन्तश्री सन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः, इत्येषां संयुक्ततत्त्वावधाने समायोजिता त्रिदिवसीया अखिलभारतीयवेदसङ्गोष्ठ्यां प्रस्तुतशोधपत्राणां संग्रहः)

## आयोजकसंस्थाः

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
सन्तश्री सन्ध्यागिरिबापुसंस्कृतविद्यालयः

## संरक्षकाः

पू. सन्तश्रीभगवद्गिरी बापु
प्रो. अर्कनाथचौधरी
प्रो. विरूपाक्षजडिपालः


## प्रकाशकः

डॉ. महेन्द्रकुमार अं. दवे
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवन रोड, वेरावलम्-३६२ २६६.

ISBN : 978-93-83097-23-4

प्रतिलिपयः - ५००
प्रकाशनवर्ष-२०१७
प्राप्तिस्थानम् - सन्तश्री सन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः,
सामख्याली, कच्छ, गुजरातम् तथा
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, राजेन्द्रभुवन रोड, वेरावलम्-३६२ २६६.

## मुद्रणम्:

जलाराम ग्राफीक्स अेन्ड ओफसेट
परमहंस अेपार्टमेन्ट के पास, होटल कावेरी के पीछे,
अेस टी रोड, वेरावल - ३६२ २६६.
फोन : (०२८७६) २२१८६१

# धेनोर्महत्त्वम्

डॉ. डायालाल मा. मोकरिया

भारतीयसंस्कृत्यां वसुधैवकुटुम्बकमिति भावना प्रवर्तते । अत: प्रकृत्या: किमपि तत्त्वमुपकारकं वर्तते तं महत्त्वं दत्तम् वर्तते । न केवलं तावदेव, तं परिवारस्य सदस्य रूपेणापि स्वीकृतमस्ति । सूर्यं पितामह:, चन्द्रं मातुल: वयं मन्यामहे तथैव धेनुमपि माता कल्पिता वर्तते । धेनोर्महत्त्वं दृष्ट्वा ऋषिमुनिभि: तस्या: गौरवं वैदिककालात् एव गीतं वर्तते ।

वैदिककाले कृषिकार्यं प्रमुखमासीत् । तेन सह पशुपालनमपि जीवननिर्वाहस्यैकं साधनमभवत् । पशुषु अपि धेनोरुपयोगिता सर्वाधिक्या आसीत् ।

ऋग्वेदस्य ऋषि: भरद्वाज: गावं पश्यति–

**गावो भगो गाव: इन्द्रो मे अच्छान् गाव: सोमस्य प्रथमस्य भक्ष: ।**

**इमा या गाव: स जानस इन्द्र, इच्छामीद्धृदा मनसा चिदिन्द्रम् ।।**[१]

गौ: मह्यं भग: (देवता) अस्ति । सैवेन्द्र: तथा च सोमरसस्य प्रथम: भक्षोऽस्ति । एवं यावत्य: धेनव: सन्ति ता: सर्वा: इन्द्रस्य साक्षात् प्रतिनिधय: सन्ति । तादृशमिद्रमत्र ऋषि: कामयते ।

गाव: दैवत्वं प्राचीनकालादेव जना: स्वीकृतवन्त: । अद्यापि जना: धेन्वां त्रयोत्रिशत् कोटिदेवतानां वास: मन्यन्ते ।

धेनोरुत्पत्तिरपि तपसैव भवति ।

ऋग्वेदस्य ऋषि: पश्यति यत् –

**या सरुपा विरुपा एकरुपा यासामग्निरिष्टया नामानि वेद ।**

**या अङ्गिरसस्तपसेह चकुस्ताभ्य: पर्जन्य ! महि शर्म यच्छ ।।**[२]

अत्र शबर: काशीवत् ऋषि: गाव: उत्पतौ अङ्गिरसऋषे: तपस: सुखदं फलं मन्यते ।

धेनुनां विविधारङ्णा: आसन् । वेदेष्वपि रोहिता (रक्ता), शुक्ला (श्वेता) पृश्नि (चित्रिता), कृष्णा – इत्यादीनां धेनुनां वर्णानां वर्णनं प्राप्यते । धेनो: रक्षक: देव: पूषन्नस्ति । अत: तस्मै अनष्टपशु रिति विशेषणमपि प्राप्यते ।[३] प्राय: धनेव: गोपानां निरीक्षणे चारणक्षेत्रे चारणं कृतवत्य: आसन् । किन्तु तदपि कदाचित् कदाचित् सङ्कटे विपतौ च आगतवत्य: आसन् । ता कदाचित् कूपे पतन्ति स्म, केदाचित् गर्ते । तदा कदाचित् तासां अङ्गभंगोऽपि भवति स्म । कदाचित् दस्यव: पणय: वा अपहरन्ति स्म, चोरयन्ति स्म । अत: तादृश्यां विपत्तौ भगवान् पूषन् रक्षति स्म । अत: तस्य अनष्टपशुरपि विशेषणं दत्तम् ।

वैदिककाले गवां विशिष्टतानुसारं नामान्यासन् यथा ऋषि: दुग्धं ददन्तीं गावं धेना अथवा धेनु: कथयति । अपत्यं ददन्तीं युवती गावं गृष्टि: कथिता । अनावृष्ट्या: कारणात् यस्या: गर्भपात् भवति तादृशीं गावं वेहत् कथिता । इत्थं तस्या: स्थित्यनुसारमपि नामकरणं भवति स्म ।

वैदिककाले गवां विशेषं महत्त्वमासीत् । गाव: एवापत्य: गौ: वृषभस्य वा उपयोग: कृषिकर्मण्यासीत् । गवां दुग्धमार्यजनानां भोजनस्यैक: भाग: आसीत् । तेषां शुद्धममिश्रतं दुग्धं प्रधानं पेयमासीत् क्षीरोदनस्यापि वर्णनमस्ति । अर्थात् पायस: अपि तेषां भोजनमासीदेवं तस्मिन् धेनो: दुग्धस्योपयोग ते कृतवन्त: आसन् । धेनो: दुग्धादेव दधे: एवं घृतस्य निर्माणं भवति । तयो: अप्यार्यजना: भोजने प्रचुरमुपयोगं कृतवन्त: ।

# कर्मकाण्डसंस्कारविज्ञानम्

(महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, श्रीसोमनाथसंस्कृतियुनिवर्सिटी, तथा सन्तश्री सन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः, इत्येषां संयुक्ततत्त्वावधाने समायोजिता त्रिदिवसीया अखिलभारतीयवेदसङ्गोष्ठ्यां प्रस्तुतशोधपत्राणां संग्रहः)


## आयोजकसंस्थाः

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
सन्तश्री सन्ध्यागिरिबापुसंस्कृतविद्यालयः

## संरक्षकाः

पू. सन्तश्रीभगवद्गिरी बापु
प्रो. अर्कनाथचौधरी
प्रो. विरूपाक्षजडिपालः

## प्रकाशकः

डॉ. महेन्द्रकुमार अं. दवे
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवन रोड, वेरावलम्–३६२ २६६.

ISBN : 978-93-83097-23-4

प्रतिलिपयः – ५००
प्रकाशनवर्ष–२०१७
प्राप्तिस्थानम् – सन्तश्री सन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः,
सामख्याली, कच्छ, गुजरातम् तथा
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, राजेन्द्रभुवन रोड, वेरावलम्–३६२ २६६.

## मुद्रणम्ः

जलाराम ग्राफीक्स अेन्ड ओफसेट
परमहंस अेपार्टमेन्ट के पास, होटल कावेरी के पीछे,
अेस टी रोड, वेरावल – ३६२ २६६.
फोन : (०२८७६) २२१८६१

# धेनोर्महत्त्वम्

डॉ. डायालाल मा. मोकरिया

भारतीयसंस्कृत्यां वसुधैवकुटुम्बकमिति भावना प्रवर्तते । अत: प्रकृत्या: किमपि तत्त्वमुपकारकं वर्तते तं महत्त्वं दत्तम् वर्तते । न केवलं तावदेव, तं परिवारस्य सदस्य रूपेणापि स्वीकृतमस्ति । सूर्यं पितामह:, चन्द्रं मातुल: वयं मन्यामहे तथैव धेनुमपि माता कल्पिता वर्तते । धेनोर्महत्त्वं दृष्ट्वा ऋषिमुनिभि: तस्या: गौरवं वैदिककालात् एव गीतं वर्तते ।

वैदिककाले कृषिकार्यं प्रमुखमासीत् । तेन सह पशुपालनमपि जीवननिर्वाहस्यैकं साधनमभवत् । पशुषु अपि धेनोरुपयोगिता सर्वाधिक्या आसीत् ।

ऋग्वेदस्य ऋषि: भरद्वाज: गावं पश्यति–

**गावो भगो गाव: इन्द्रो मे अच्छान् गाव: सोमस्य प्रथमस्य भक्ष: ।**

**इमा या गाव: स जानस इन्द्र, इच्छामीद्धृदा मनसा चिदिन्द्रम् ।।[1]**

गौ: मह्यं भग: (देवता) अस्ति । सैवेन्द्र: तथा च सोमरसस्य प्रथम: भक्षोऽस्ति । एवं यावत्य: धेनव: सन्ति ता: सर्वा: इन्द्रस्य साक्षात् प्रतिनिधय: सन्ति । तादृशमिद्रमत्र ऋषि: कामयते ।

गाव: दैवत्वं प्राचीनकालादेव जना: स्वीकृतवन्त: । अद्यापि जना: धेन्वां त्रयोत्रिंशत् कोटिदेवतानां वास: मन्यन्ते ।

धेनोरुत्पत्तिरपि तपसैव भवति ।

ऋग्वेदस्य ऋषि: पश्यति यत् –

**या सरुपा विरुपा एकरुपा यासामग्निरिष्टया नामानि वेद ।**

**या अङ्गिरसस्तपसेह चकुस्ताभ्य: पर्जन्य ! महि शर्म यच्छ ।।[2]**

अत्र शबर: काशीवत् ऋषि: गाव: उत्पतौ अङ्गिरसऋषे: तपस: सुखदं फलं मन्यते ।

धेनुनां विविधारङ्गा: आसन् । वेदेष्वपि रोहिता (रक्ता), शुक्ला (श्वेता) पृश्नि (चित्रिता), कृष्णा – इत्यादीनां धेनुनां वर्णानां वर्णनं प्राप्यते । धेनो: रक्षक: देव: पूषन्नस्ति । अत: तस्मै अनष्टपशु रिति विशेषणमपि प्राप्यते ।[3] प्राय: धनेव: गोपानां निरीक्षणे चारणक्षेत्रे चारणं कृतवत्य: आसन् । किन्तु तदपि कदाचित् कदाचित् सङ्कटे विपतौ च आगतवत्य: आसन् । ता कदाचित् कूपे पतन्ति स्म, केदाचित् गर्ते । तदा कदाचित् तासां अङ्गभंगोऽपि भवति स्म । कदाचित् दस्यव: पणय: वा अपहरन्ति स्म, चोरयन्ति स्म । अत: तादृश्यां विपत्तौ भगवान् पूषन् रक्षति स्म । अत: तस्य अनष्टपशुरपि विशेषणं दत्तम् ।

वैदिककाले गवां विशिष्टतानुसारं नामान्यासन् यथा ऋषि: दुग्धं ददन्तीं गावं धेना अथवा धेनु: कथयति । अपत्यं ददन्तीं युवती गावं गृष्टि: कथिता । अनावृष्टया: कारणात् यस्या: गर्भपात् भवति तादृशीं गावं वेहत् कथिता । इत्थं तस्या: स्थित्यनुसारमपि नामकरणं भवति स्म ।

वैदिककाले गवां विशेषं महत्त्वमासीत् । गाव: एवापत्य: गौ: वृषभस्य वा उपयोग: कृषिकर्मण्यासीत् । गवां दुग्धमार्यजनानां भोजनस्यैक: भाग: आसीत् । तेषां शुद्धममिश्रतं दुग्धं प्रधानं पेयमासीत् क्षीरोदनस्यापि वर्णनमस्ति । अर्थात् पायस: अपि तेषां भोजनमासीदेवं तस्मिन् धेनो: दुग्धस्योपयोग ते कृतवन्त: आसन् । धेनो: दुग्धादेव दधे: एवं घृतस्य निर्माणं भवति । तयो: अप्यार्यजना: भोजने प्रचुरमुपयोगं कृतवन्त: ।

प्राचीनकाले धेनुरेव धनमासीत् यस्याधिक्य: धनेव: आसन् स: धनवान् गणयते स्म । क्रय-विक्रयस्य स्थाने अपि प्राय: धेनु: आसीत् । दक्षिणायामपि धनो: दानमभूत् ।

हरिनारायण दीक्षित: राधाचरिते गाव: गौरवं वर्णयति यत् –

**गौरेव सूतेऽत्र सुधात्रयीं यत् सैव प्रसूते वृषभांश्च कृष्यै ।**

**जनास्तया वैतरणीं तरन्ति तत्पालने तन्नहि हीनभाव: ।।**[४]

अर्थात् गावोऽमृतं ददाति । तस्या: दुग्धममृतमस्ति । तस्मातदेव निर्मितं दध्यापिमृतम् अस्ति एवं घृतमपि अमृतमस्ति । न केवलं तावदेव तस्या: एव अपत्यवृषभ: कृषिकर्मणि उपयोगी भवति । तस्य जन्मदात्री धेनुरेवास्ति । कवि: तु तावत् कथयति यत् मृत्यु-अनन्तरं जना: तया साहाय्येन वैतरणीं नदीं तरन्ति । अत: तस्या: पालनपोषणे हीनभाव: नागच्छेत् । इत्थमेकस्मिन्नेव सुभाषिते कविना गाव: संक्षेपेण सम्पूर्णं महत्त्वं वर्णितमस्ति ।

कश्चित् अज्ञातकविरपि कथयति–

**गवां सेवा तु कर्तव्या गृहस्थै: पुण्यलिप्सुभि: ।**

**गवां सेवापरो यस्तु तस्य श्रीर्वर्धतेऽचिरात् ।।**[५]

गृहस्थ: धेनो: सेवां करोति तदा स: पुण्यमपि प्राप्नोति । प्राचीनसाहित्ये तस्य उदाहरणान्यपि सन्ति । यथा राजा दुष्यन्त: गाव: सेवां कृत्वा चक्रवर्तिनं पुत्रं प्राप्नोति । य: जन: गाव: सेवापरायण: भवति स: श्रीमान्नपि भवति । अचिरात् स: मनुष्य: ऐश्वयं प्राप्नोति ।

हिन्दुधर्मे एव न किन्तु यवनधर्मे अपि गाव: महत्त्वं प्रतिपादितं वर्तते । यथा हजरत मोहम्मद: हजरत आयशायां कथयति यत् –

रसूल: अल्लाह, आदिशति यत् गाव: दुग्धं शिफा अस्ति एवं घृतम् औषधमस्ति तथा मांसं नितान्तं रोग: एवास्ति ।[६]

वेदव्यासोऽपि महाभारते वर्णयति यत्

**गोभिस्तुल्यं न पश्यामि धनं किञ्चिदिहाच्युत ।**

**कीर्तनं श्रवणं दानं दर्शनं चापि पार्थिव ।**

**गवां प्रशस्यते वीर सर्वपापहरं शिवम् ।।**[७]

महर्षे: व्यासस्य मतानुसारं गाव: एव संसारस्य महत् धनम् अस्ति । गवां नाम एव गुणानां कीर्तनं श्रवणं वा, गाव: दानं दर्शनं च प्रशस्यते । गाव: सन्दर्भे एतत् सर्वं कार्यं पापहरं वर्तते एवं कल्याणस्य प्राप्तिं काररयति ।

प्राय: सर्वे विद्वांस: धेनुं धनं मन्यन्ते । भारतीये शास्त्रे तु तथ्य वर्तते, किन्तु पश्चिमस्थेषु देशेष्वपि प्राचीनकाले तादृशम् आसीत् । यथा लेटिनभाषायां पेकुस (Pecus) शब्द: वर्तते तस्यार्थ: सम्पति: भवति एवं तस्मात् अंग्रेजीशब्द: पेक्युनियरी (Pecuniary) जायते । भाषाशास्त्रस्य दृष्ट्या संस्कृतस्य पशु: इत्यनेन शब्देन सह सम्बन्धितोऽस्ति । अर्थात् प्राचीनकाले प्राय: सर्वत्र धेनो: अथवा तादृशाणां पशुनामधिकं महत्त्वम् आसीत् ।

इत्थमस्माकं शास्त्रेषु धेनो: यथार्थ महत्त्वं दत्तम् वर्तते । आरोग्यशास्त्रे अपि धेनो: दुग्ध-दधि-घृत-मलमूत्रादीनां विशेषं महत्त्वं वर्णितमस्ति । गाव: इदं महत्त्वं दृष्ट्वा एव हिन्दुसंस्कृत्यां तां मातु: गौरवं प्रदतं वर्तते । अद्य धेनुनां रक्षणाय प्रश्न: समुत्पन्न: । महीष्या: अपेक्षया धेनो: दुग्धमल्पं भवति तादृशं घट्टं न भवति अत: जना: आर्थिकलाभाय धेनुं त्यक्त्वा महीषीं स्वीकुर्वन्ति । धेनोरपत्य वृषभोऽधुना निरुपयोगी वर्तते यतोहि यन्त्राणि अगतानि सन्ति । यथा ट्रेक्टरादिभि:

यन्त्रैः जनाः कृषीकार्यं कर्तुं शक्नुवन्ति । यदा यत्रं चालयति तदा एव धनव्ययः भवति किन्तु वृषभाय तादृश नास्ति तस्य पालनपोषणमावश्यकं समयानुसारं च स्यात् तस्य जनानां दायित्वमापतति अतोऽपि जनानां कृते धेनोः महत्त्वं न्यूनं भवन्नस्ति ।

गावः वैज्ञानिकदृष्ट्याप्यधिक्युपयोगी वर्तते । यथा तस्याः मेरुदण्डे (रिढ) सूर्यकेतुनाडी भवति । सा सर्वरोगानां नाशं करोत्येवं सर्वविषनाश क्येव्यस्ति ।

धेनुरेवेकः तादृशः पशुः वर्तते सः प्राणवायु स्वीकृत्य प्राणवायु एव निस्सारयति ।

रुसप्रदेशे गावः घृतेन यज्ञ कृत्वा एकः प्रयोगः कृतः । दशग्रामपरिमितेन घृतेन यज्ञं कृत्वा एक टन परिमितं प्राणवायु (ओक्सिजनवायु) प्राप्यते ।

गावः दुग्ध-दधि-धृत-मल-मूत्रैः पञ्चगव्यं भवति । तेन गुजरातप्रदेशे वलसाड प्रान्ते केन्सर चिकित्सालये त्रिसहस्रजनान् केन्सररोगस्य चिकित्सा जाता । पञ्चगव्यस्य केन्सरनाशकप्रभावस्य यु. एस. तः भारतेन पेटेन्ट प्राप्तं कृतम् ।

धेनुनां विविधाः जातयः प्राप्यन्ते, यथा सायवाल (पंजाब), सिंधि (सिंधस्य कोहिस्तान), काँकरेज (गुजरात-अहमदाबाद, काठियावाड, बडौदा, सूरत) काँकरेज – सर्वांगीधेनुः अस्ति । तस्याः इप्सा विदेशे अपि भवति । मालवी (ग्वालियर) नागौरी (जोधपुर) थरपाकर (कच्छ, जैसलमेर, जोधपुर एवं सिंध) पवांर, भगनाडी, दज्जल, गावलाव, हरियाना, अंगोल, आथवा नीलोर (तमिलनाडु) इत्यादयः जातयः सन्ति ।

धेनोः वधः महापातकमस्ति । देवी भागतानुसारं तादृशाः जनाः नरकं यान्ति ।

विश्वे धेननां संख्या १३ खरब (१.३ बिलियन) भवितु शक्यते ।

भारतीयसंस्कृत्यां धेनुः माता कथिता तद् सार्थकम् अस्ति । यथा माता निस्वार्थभावेन सन्ततिं पोषयति तथैव धेनुरपि सर्वं दत्त्वास्मानुपकरोति । तस्याः उश्वासादुर्वरकपर्यन्तं सवमुपकारकं वर्तते । अतः अस्माकं शास्त्रेषु तस्याः महत्त्वं प्रतिपादितमेवं वैज्ञानिकैः समर्थनं कृतम् तत् नितान्तं ग्राह्यमस्ति ।

**सन्दर्भसूची :-**


१. ऋग्वेदः – ६.२८.५

२. तत्रैव, १०.१६७.२

३. पूषा त्वेतश्च्नयावतु प्रविद्वानवष्टपशु र्भुवनस्य गोपाः । ऋग्वेदः १०.१७.३

४. राधाचरितम् – १९.१२९

५. सूक्तिसागर – पृ. १९५

६. तत्रैव, पृ. १९५

७. तत्रैव, पृ. १९४

८. गोहत्यां ब्रह्महत्यां च करोति ह्यतिदेशिकीम् ।

यो हि गच्छन्त्यगम्यां च यः स्त्रीहत्यां करोति च ।

भिक्षुहस्यां महापापी भ्रुणहत्यां च भारते ।

कुम्भीपाके वत्सेत्सोऽपि यावदिन्द्राश्चतुर्दश ।।

– देवीभागवतपुराणम् – २३/२४



आसि. प्रोफेसर, अनुस्नातक भवनम्,

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम

प्रकाशकः -

प्रो. महेन्द्रकुमारः दवे
का.कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवनरोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाष : ०२८७६-२४४५३२, फेक्सः २४४४१७
www.sssu.ac.in

सहसम्पादकः समन्वयकश्च -

डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

© *Shree Somnath Sanskrit University, Veraval - 2018*

प्रथमं संस्करणम् - मई - २०१८

प्रतयः - ३५०

ISBN - 978-93-83097-27-2

मूल्यम् - रु. २०० /-

मुद्रकः - जलाराम ग्राफिक्स एन्ड ओफसेट
परमहंस अेपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) २२१८६१

**Shree Somnath Sanskrit University Grantha Series - 10**

# VĀKYĀRTHAJYOTIḤ

Issue - 2 Year - 2015-16

Chief Editor
**Pro. Ark Nath Chaudhary**
Vice-Chancellor
Shree Somnath Sanskrit University, Veraval

Editors
**Dr. Pankajkumar Rawal**
**Dr. Satrughna Panigrahi**

**Shree Somnath Sanskrit University - Veraval - Gujarat**

सन्दर्भग्रन्थाः

(१) श्रीमद्भगवद्गीता ।
(२) श्रीमद्भागवतमहापुराणम् ।
(३) पाणिनीय शिक्षा ।
(४) नीतिशतकम् ।
(५) चाणक्यनीतिः ।
(६) हितोपदेशः ।
(७) पञ्चतन्त्रम् ।
(८) बृहद्कथामञ्जरी ।
(९) महाभारतम् ।
(१०) रामायणम् (वाल्मिकीय) ।
(११) सदुक्तिकर्णामृतम् ।
(१२) सुभाषितपुष्पमाला ।
(१३) विष्णुपुराणम् ।
(१४) उपनिषद् सुधा ।
(१५) शास्त्रसिंहावलोकनम् ।
(१६) प्राणिकथासंग्रहः ।

# संस्कृतसाहित्ये पित्रोः गौरवम्

डॉ. डायालाल मोकरिया
आसि. प्रोफेसर, अनुस्नातकभवनम्,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

ऋषिमुनिभिः मनुष्यस्य सामाजिकजीवनस्य आनन्दाय सानुकुलतायै सामाजिकी व्यवस्था निर्मिता । तस्यां व्यवस्थायां ब्रह्मचर्याश्रमः गृहस्थाश्रमः वानप्रस्थाश्रमः एवं सन्यस्थाश्रमः वर्तते । तेषु आश्रमेषु अपि गृहस्थाश्रमः श्रेष्ठः अस्ति । मुनिवरः व्यासः लिखति –

आश्रमास्तुलया सर्वान् धृतानाहुर्मनीषिणः ।
एकतश्च त्रयो राजन् ! गृहस्थाश्रम एकतः ॥ [१]

गृहस्थाश्रमः सर्वोपरि अस्ति । गृहस्थाश्रमस्य कुटुम्बव्यवस्था अपि भव्या अस्ति । माता, पिता, भ्राता, भगिनी, पतिः पत्नी- इत्यादयः सम्बन्धाः गृहस्थाश्रमे एव दृश्यन्ते । तस्मिन् सर्वेषां स्वगौरवमस्ति । अस्मिन् शोधपत्रे पित्रोः गौरवं प्रस्तुतमस्ति।

अस्माकं संस्कृतिः दर्शयति यत् –

मातृदेवो भव ।
पितृदेवो भव । [२]

तैतिरीयोपनिषद् स्पष्टं सूचयति यत् माता देवता अस्ति । पिता अपि देवः अस्ति । अर्थात् अस्माकं पित्रोः दिव्यत्वमस्ति । देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा[३] । तौ निस्वार्थैः उपकारैः प्रकाश्येते । कामपि कामनां विना तौ पुत्रं पुत्रीं च स्नेहं शक्तिं उर्जां च ददतः ।

अस्माकं जन्मदात्री जननी तु माता अस्ति एव किन्तु नराभरणे

अन्यस्त्रीणामपि मातास्वरुपे गणना कृता –

गुरुपत्नी राजपत्नी ज्येष्ठपत्नी तथैव च ।
पत्नीमाता स्वमाता च पञ्चैता मातरः स्मृताः ॥

गुरोः पत्नी माता अस्ति । सा अपि मातृवत् शिष्यान् पालयति । राज्ञः पत्नी अपि माता अस्ति । सा प्रजां मातृवत् रक्षति । राजमाता मीणल दे तस्याः उदाहरणं मस्ति । ज्येष्ठभ्रातुः पत्नी अपि माता भवति । रामायणे लक्ष्मणस्य सीतायाः च उत्तमम् उदाहरणमस्ति यत् लक्ष्मणः भ्रातृजायां मातृवत् मत्वा मुखमपि न पश्यति एवं प्रतिदिनं पादवन्दनं करोति । पत्न्याः माता अर्थात् श्वश्रूः अपि माता भवति । सा अपि जामातां पुत्रवत् पश्यति । एवं स्वमाता जननी तु माता अस्ति तत् तु सर्वविदितमस्ति ।

यथा काः काः मातरः भवन्ति तस्य वर्णनं शास्त्रे वर्तते तथैव पित्रे अपि निर्देशं प्राप्यते । यथा –

जनकश्चोपनेता च यश्च विद्यां प्रयच्छति ।
अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ॥

अस्माकं जन्मदाता तु पिता अस्ति एव किन्तु उपनयनसंस्कारं करोति सः अपि पिता एव अस्ति । विद्यां दत्वा अज्ञानरूपान्धकारात् ज्ञानप्रकाशे यः आनयति सः विद्यादाता अपि अस्माकं पिता एव अस्ति । जीवननिर्वाहार्थं विद्या अतीवामहत्त्वपूर्णा अस्ति । यां विना मनुष्यः तु किं कस्यचिद् जीवस्य जीवनं शक्यं नास्ति । आवश्यकी विद्या तु प्राप्तव्या एव । अन्नं विना जीवितुं न शक्नुमः । अन्नमित्युक्ते अन्नाय आजिविकां करोति सः अपि अस्माकं पिता अस्ति । भयात् यः रक्षति सः अपि अस्माकं पिता भवति । प्रायः मनुष्यः भयेन त्रस्तः भवति अतः तु अस्माकं शास्त्रेषु भयात् रक्षणार्थं प्रप्रथमा प्रार्थना भवति – अभयं देहि .....इत्यादयः अतः यः :



भयात् रक्षति सः अपि पिता अस्ति ।

महाभारते मातुः पितुः च गौरवं व्यासमुनिः वर्णयति –

माता गुरुतरा भूमेः खात् पितोच्चतरस्तथा ।

पिता आकाशात् अपि उच्चतरः अस्ति । सः अतीव महत्त्वपूर्णः अस्ति एवं माता तु भूमेः अपि गुरुतरा अस्ति । मनुष्यजीवने भूमेः सर्वाधिकं महत्त्वं वर्तते । तां विना मनुष्यस्य अस्तित्वम् एव नास्ति किन्तु माता तु तस्याः अपि गुरुतरा वर्तते अतः तु गुजराती कविः बोटादकरः अपि कथयति –

જનનીની જોડ સખી નહીં જડે રે લોલ !
મીઠા મેવા ને મીઠા મેહુલા રે લોલ !
એથી મીઠા છે માના હેત જો જનનીની જોડ સખી નહીં જડે રે લોલ

मेवा इत्युक्तेमधुरं स्वादिष्टं भोजनम् मनुष्यस्य जीवने 'मेवा' इत्युक्ते अन्नं महत्त्वपूर्णं वर्तते । तस्य आधारः मेघः वर्तते । मनुष्याय तौ रोचेते किन्तु ततः अपि माता गुरुतरा वर्तते । तथैव महाकविः प्रेमान्दः अपि लिखति –

માતા વગરની દીકરી
જેવી ફૂટેલા ઘડાની ઠીકરી ॥

यथा घटः भग्नः भवति तदनन्तरं तस्य किमपि महत्त्वं नास्ति तथैव मातरं विना पुत्र्याः अपि स्थितिः भग्नघटवत् भवति ।

स्कन्दपुराणे अपि मातुः गौरवं वर्णितम् अस्ति –

नास्ति मातृसमा छाया नास्ति मातृसमा गतिः ।
नास्ति मातृसमं त्राणं नास्ति मातृसमा प्रपा ॥

यथा वृक्षः अपेक्षां विना छायां ददाति तथैव माता अपि सर्वेभ्यः छायाम् आश्रयं शान्तिं वा ददाति। मनुष्यस्य गतिः अपि मातरि एव अस्ति। जनः कुत्रचिदपि न स्वीक्रीयते तदा अपि माता तस्य गतिः भवति। सुरक्षा अपि मातुः अङ्के एव भवति, अयि ! रुदन् बालकः मातुः अङ्के शान्तः भवति तथैव माता एव मनुष्यस्य इप्सानां पूर्तिं कर्तुं शक्नोति।

पद्मपुराणम् अपि मातुः पितुः च गौरवं गायति।--

**मातरं पितरं चैव यस्तु कुर्यात् प्रदक्षिणम्।**

**प्रदक्षिणीकृता तेन सप्तद्विपा वसुन्धरा॥** [९]

यः जनः मातुः पितुः च प्रदक्षिणां करोति सः सप्तद्विपायाः पृथव्याः प्रदक्षिणां करोति तावत् फलं प्राप्नोति। अर्थात् अस्यां पृथव्यां माता पिता च अत्यधिकं महत्त्वं धरतः। यथा मातुः अनन्यमहत्त्वम् अस्ति तथैव पितुः अपि गौरवम् अस्माकं शास्त्रेषु वर्णितम् अस्ति।

वाल्मीकिरामायणे लिखितम् अस्ति यत् पितुः सेवायाः अपेक्षया महत्ततरम् अन्य धर्माचरणं नास्ति। आधुनिकयुगे जनरेशनगेप – इत्यस्य समस्या दृश्यते। प्रायः पुत्रः पितुः आज्ञायाः उल्लंघनं करोति एवं स्वतन्त्राम् इच्छति। तादृशाणां पुत्राणां कृते रामायणे उपदेशः प्रदत्तः यत् पितुः आज्ञायाः अपेक्षया महत्तरं किमपि नास्ति। तस्य एव वचनस्य विचारस्य च पालनं करणीयम्। तस्मिन्नेव धर्माचरणम् अस्ति। तस्मात् अन्य किमपि श्रेष्ठं नास्ति।

ब्रह्माण्डपुराणे अपि पितृभक्त्याः गौरर्वं वर्णितम् अस्ति –

यज्ञान् वेदास्तथा कामांस्तपांसि विविधानि च।

प्राप्नोत्यायुः प्रजाश्चैव पितृभक्तो,न संशयः॥ [१०]

पितृभक्तः सर्वं प्राप्नोति। सः वेदान् यज्ञान् कामान्, विविधानि तपांसि आयुः एवं प्रजाः प्राप्नोति। सुखस्य समृद्धेः यानि तत्त्वानि सन्ति



तानि सर्वाणि पितृभक्तः प्राप्नोति।

इतिहासे अपि वयं दृष्टुं शक्नुमः ये पित्रोः सेवां कृतवन्तः तेषां नामानि अद्यापि अमराणि सन्ति। यथा, मातृपितृभक्तः श्रवणः रामायणस्य अमरपात्रः वर्तते।

पित्रोः गौरवं अवर्णनीयमेव अस्ति। भगवतः कृते उक्तमस्ति यत्–

असीतगिरिसमं स्यात् कज्जलं सिन्धुपात्रे

सुरतरुवरशाखा लेखनी पत्रमुर्वी।

लिखति यदि गृहित्वा शारदा सर्वकालं

तदपि तवगुणानामीशपारं न याति॥

तथैव पित्रोः कृते अपि वक्तुं शक्नुमः। एवं च तौ अपि भगवतः एव स्वरूपौ वर्तेते एव। अतः तयोः गुणानां स्मरणं कृत्वा अत्रभावपूजनम् एव वरमस्ति।

सन्दर्भाः-


१ महाभारतम्, शान्तिपर्व, १२/१२

२ तैत्तिरीयोपनिषद् १/११

३ रुक्तम्, ७/१५

४ राभरणम् २/८

५ तिशास्त्रम्-८०

६ महाभारतम्–वनपर्व, ३/३/६०

७ કુવરબાઇનું મામેરું, પૃ. ૧૦૧

८ स्कन्दपुराणम्–मा. कौ. ६.१०३-१०४

९ पद्मपुराणम्, ५/४६/१३

१० ब्रह्माण्डपुराणम्, म. ३/१९/६८

# नरसिंहः

# Narasinha

लेखक:
Author
डॉ.डायालाल: मालदेभाई मोकरिया
Dr.Dayalal Maldebhai Mokariya

प्रकाशक:
डॉ.डायालाल: मालदेभाई मोकरिया
Dr. Dayalal Maldebhai Mokariya
2018.

(नरसिंहः- Narasinha) by Dr.Dayalal Maldebhai Mokariya

©लेखकः- Author.

ISBN : 978-81-939720-0-7
Fist Edition, 2018.

Reviewers:

1. Pro.Mahendrakumar A. Dave
   Dean, Sahity Vibhag, Shree Somanath Sanskrit University,veraval
2. Prof.Niranjanbhai Patel
   .Head Dept. of Sanskrit, S.P.University,V.V Nagar
3. pro. Mahendra Pandey
   Head Dept. of Ved , SS.University, Varanasi

प्रकाशकः :- Publisher :
डॉ.डायालालः मालदेभाई मोकरिया
Dr. Dayalal Maldebhai Mokariya

Price- 100 Rs.

: Printing
Jalaram Graphics

## वन्दनम्

नरसिंहकाव्यस्य निष्पत्तौ भक्तस्मरणं भक्तवन्दनेव वर्तते । स्वयं भक्तराजस्य पदकाव्यानां पूजनेन, प्रेमानन्दकृतनरसिंहसन्दर्भितकाव्यानामास्वादेन, गीताप्रेस-गोरखपुरद्वारा प्रकाशितेन भक्त नरसिंह महेता-इत्यनेन ग्रन्थेन पुष्पितम् नरसिंहमनुलक्ष्य प्रचलितानि चलचित्राणि दृष्ट्वा रचितमेतत् काव्यं भक्तपूजनमेवास्ति । भक्तस्य चरणकमलयोः समर्पितस्यास्य पुष्पस्य सुगन्धं भावकाः अनुभवन्तु । तादृशी सर्वेषां हृदये विद्यमानं भगवन्तं प्रति प्रार्थनास्ति ।

- डा. मा. मोकरिया

# અભિજ્ઞાનશાકુન્તલની સૂક્તિસૌરભ

# Abhigyanshakuntal ni sooktisaurabh

લેખક

Author

ડૉ.ડાયાલાલ માલદેભાઈ મોકરિયા

Dr.Dayalal Maldebhai Mokariya

પ્રકાશક

ડૉ.ડાયાલાલ માલદેભાઈ મોકરિયા

Dr. Dayalal Maldebhai Mokariya

2018.

અભિજ્ઞાનશાકુન્તલની સૂક્તિ સૌરભ

(Abhigyanshakuntal Ni Sooktisaurabh)

©લેખક- Author.

ડૉ.ડાયાલાલ માલદેભાઈ મોકરિયા

Dr.Dayalal Maldebhai Mokariya

ISBN : 978-81-939720-1-4

પ્રથમ આવૃત્તિ. Fist Edition, 2018 Nov.

સમીક્ષકો - Reviewers:

1. પ્રો.મહેન્દ્રકુમાર અં.દવે Pro.Mahendrakumar A. Dave
   ડિનશ્રી સાહિત્યવિભાગ ,શ્રી સોમનાથ સંસ્કૃત યુનિવર્સિટી,વેરાવળ.
   Dean, Sahity Vibhag,Shree Somanath Sanskrit University,veraval
2. પ્રો.નિરંજનભાઈપટેલ Prof.Niranjanbhai Patel
   અધ્યક્ષ,સંસ્કૃતવિભાગ,સરદાર પટેલ યુનિવર્સિટી,વલ્લભવિદ્યાનગર,આણંદ.
   Head Dept. of Sanskrit, S.P.University,V.V Nagar
3. પ્રો.ડી.બી.રાઠવા Prof.D.B.Rathava
   અધ્યક્ષ,સંસ્કૃતવિભાગ,હેમચન્દ્રાચાર્ય ઉત્તર યુનિવર્સિટી,પાટણ
   Head Dept. of Sanskrit,HNG.University,Patan

પ્રકાશક :- Publisher:

ડૉ.ડાયાલાલ માલદેભાઈ મોકરિયા

Dr.Dayalal Maldebhai Mokariya

Price-51 R. કિંમત-૫૧ રૂ.

મુદ્રણ : Printing

જલારામ ગ્રાફિક્સ Jalaram Graphics

## સમર્પણ

સંસ્કૃત સાહિત્યમાં કુલગુરુ કવિવર કાલિદાસની તમામ કૃતિઓ આસ્વાદનીય છે. સહૃદય તેમની પ્રત્યેક કૃતિમાંથી સાહિત્યરૂપી અમૃતનો આસ્વાદ માણતાં ક્યારેય પણ આટકતો નથી. આ કવિશ્રેષ્ઠની કૃતિ અભિજ્ઞાનશાકુન્તલનું જેટલી વખત રસપાન કરું છું તેટલી વખત નિત્યનૂતન ઉષાની જેમ નવો જ આસ્વાદ આપે છે. આ પ્રકારના ગ્રંથની સૂક્તિઓને વિષયવાર વિભાગ કરી, તેનો અન્ય સાહિત્યકૃતિઓના કવિઓએ રજૂ કરેલ વિચારો સાથે સમીક્ષા કરવાનો આ ગ્રંથમાં નમ્ર પ્રયાસ કરવામાં આવ્યો છે. આશા છે કે હૃદયીઓને આ ગ્રંથ ગમશે. હર હંમેશ જેમના આશીર્વાદ સાથે જ હોય છે તેવા પૂજ્ય પિતા માલદેભાઈ અને પૂજ્યા માતૃશ્રી માલીબાને આ ગ્રંથ સાદર અર્પણ કરું છું.

ડાયાલાલ મોકરિયા.